# Shri Bhadradri Rama Sharanagati

# શ્રી ભદ્રાદ્રીરામ શરણાગતિઃ

## Document Information

Text title : Shri Bhadradri Rama Sharanagati

File name : bhadrAdrIrAmasharaNAgatiH.itx

Category : raama

Location : doc_raama

Latest update : April 28, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રી ભદ્રાદ્રીરામ શરણાગતિઃ

શ્રીમત્પયોરુહસુધાકલશાતપત્ર
    મત્સ્યધ્વજાઙ્કુશધરાદિમહાર્ષચિહ્નૌ ।
પદ્મપ્રવાલમણિવિદ્રુમમઞ્જુશોભૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૧॥

વામાઙ્કુહસ્તધૃતભૂમિસુતારથાઙ્ગ
    સઙ્ખાશુગપ્રણયિસવ્યકરાડબ્જનેત્ર ।
પાર્શ્વસ્થચાપધરલક્ષ્મણ તાવકીનૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૨॥

ફુલ્લારવિન્દરુચિરા વનિશં લસન્તૌ
    સંવર્તિકાલિસમતાલલિતાઙ્ગુલીકૌ ।
તત્સૂતમૌક્તિકફલાયિતસન્નિભૌ તે
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૩॥

ભક્ત્યર્પિતસ્ફુરદુદારસરોરુહાલી
    સમ્યગ્વિલગ્નમકરન્દલવાભિશઙ્કામ્ ।
પાદાઙ્ગુલીનખમિષાત્ પરિકલ્પયન્તૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૪॥

મુક્તાવલી લસતિ વિષ્ણુપદે તવેતિ
    વેદઃ પ્રબોધયતિ તાં નખરાલિરક્ષ્યાત્ ।
પ્રત્યક્ષતઃ પ્રકટનેન તતોઽદિકૌ તે
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૫॥

નીહારબિન્દુદલશોભિતનાલપદ્મે
    ભાસ્વન્નખાઙ્ગુલિસુજઙ્ઘતયા વિજિત્ય ।
વિધ્યર્ચિતૈ રિવ સુમૈર્વિહિતાટ્ટહાસૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૬॥

પૂર્ણઃ કલઙ્કરહિતો વિધુ રાનનાત્મ
    સૂર્યપ્રભાઽભિભવમુક્તમતિ પ્રસન્નામ્ ।
તારાવલી મિવ નખાવલિ માવહસ્તૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૭॥

શ્રુત્યઙ્ગનાકચભરાન્તરરાજમાન
    સિન્દૂરરેણુમિલના દિવ ભક્તાહૃત્સુ ।
વાસાતિરેકવશતઃ કિલ જાતરાગૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૮॥

કોટીરકોટિઘટના દિવ દેવતાનાં
    કોપાદિવામ્બુરુહવિદ્રુમપલ્લવેષુ ।
ભક્તાલિવૈરિકલના દતિમાત્રરક્તૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૯॥

ભેદોઽસ્તિ નૈવ ખલુ દારુશિલાદિકાનાં
    આલોચ્ય ચૈવ મખિલાકરચૂર્ણભાજૌ ।
સંક્ષાલિતૌ સુમનસા તરિજીવિના તે
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૧૦॥

ધ્યાનૈકનિઘ્નમુનિમાનસવાસકાલે
    સક્તાનુરાગયુતસત્યગુણૈકશઙ્કામ્ ।
ભક્તાવલેર્નખરુચા પરિકલ્પયન્તૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૧૧॥

ઉન્માર્ગકર્ષિમુનિમાનસવારણાનાં
    શબ્દાદિભોગમદવારિમલીમસાનામ્ ।
આલાનપાદદૃઢતાકરકીલગુલ્ફૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૧૨॥

માયામૃગાર્થ મવનીતનયાનિયોગાત્
    આયાસપૂર્વ મટવીતટદૂરચારાત્ ।
આરક્તકોકનદકોમલકાન્તિભાજૌ
    ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૧૩॥

ભૂમીસુતાકરતલોદરરાજમાન

કાશ્મીરકાન્તિમિલના દિવ રાગવન્તૌ ।
ભક્તૌઘરક્ષણકલાતિવિચક્ષણૌ તે
ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૧૪॥

પાથોધિજન્મપરિકલ્પિતપાદ્યધારૌ
ફાલાક્ષમૂર્ધઘડતપાવનતીર્થહેતૂ ।
પાષાણ મેણનયનાવિભવં નયન્તૌ
ભદ્રાદ્રિરામચરણૌ શરણં પ્રપદ્યે ॥ ૧૫॥

શ્રી વેઙ્કટાર્યપદપઙ્કજસેવકેન
શ્રી શ્રીનિવાસ ચરમાવધિકિઙ્કરેણ ।
પ્રોક્તા પ્રપત્તિવિનુતિં પઠતાં જનાનાં
ભદ્રાદ્રિરાડ્દિશતુ ભદ્ર મનિદ્રમેવ ॥ ૧૬॥

ઇતિ શ્રી ભદ્રાદ્રીરામ શરણાગતિઃ સમાપ્તા ।

---

*Shri Bhadradri Rama Sharanagati*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*